# Ganesha Stuti by Tattva

# ગણેશસ્તુતિઃ તત્ત્વૈઃ કૃતા

## Document Information

Text title : Ganesha Stuti by Tattva

File name : gaNeshastutiHtattvaiHkRRitA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 7 -8

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# Ganesha Stuti by Tattva

## ગણેશસ્તુતિઃ તત્ત્વૈઃ કૃતા

શ્રીગણેશાય નમઃ ।

તત્ત્વાન્યૂચુઃ ।

નમસ્તે વક્રતુણ્ડાય ભક્તસંરક્ષકાય ચ ।
સર્વાધીશાય સર્વાય ગણાનાં પતયે નમઃ ॥ ૩૯॥

અવ્યક્તાવ્યક્તરૂપાય સત્યાસત્યાય તે નમઃ ।
સમાય વિષમાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૪૦॥

આત્મનેઽનાત્મને તુભ્યં નિર્ગુણાય ગુણાત્મને ।
નામરૂપધરાયૈવ દ્વાભ્યાં હીનાય તે નમઃ ॥ ૪૧॥

અનન્તોદરસંસ્થાય નાનાભોગકરાય ચ ।
ભોગહીનાય સર્વત્ર સ્વાનન્દપતયે નમઃ ॥ ૪૨॥

માયાધારાય વૈ તુભ્યં માયાહીનાય તે નમઃ ।
માયિનાં મોહકારાય સર્વજ્ઞાય ચ તે નમઃ ॥ ૪૩॥

સર્વસિદ્ધિધરાયૈવ સિદ્ધીનાં પતયે નમઃ ।
સિદ્ધિહીનાય સિદ્ધાય સિદ્ધાનાં પતયે નમઃ ॥ ૪૪॥

જગન્મયાય વૈ તુભ્યં જગદ્ધીનાય તે નમઃ ।
કર્મણાં ફલદાત્રે ચ કર્મરૂપાય તે નમઃ ॥ ૪૫॥

કર્મહીનાય તેઽજ્ઞાનજ્ઞાનદાત્રે નમો નમઃ ।
જ્ઞાનિનાં જ્ઞાનકર્ત્રે ચ જ્ઞાનહીનાય તે નમઃ ॥ ૪૬॥

ચતુર્વિધધરાયૈવ ચતુર્વિધમયાય ચ ।
ચતુર્વિધવિહીનાય સ્વસંવેદ્યાય તે નમઃ ॥ ૪૭॥

પાશાઙ્કુશધરાયૈવ દન્તાભયધરાય ચ ।
ચતુર્ભુજાય વૈ શૂર્પશ્રુતયે તુન્દિલાય ચ ॥ ૪૮॥

મહતે ચૈકદન્તાય મહતાં ચ મહીયસે ।
લઘવે લઘુરૂપાય લઘૂનાં લાઘવે નમઃ ॥ ૪૯॥

ગજવક્ત્રાય દેવાય બ્રહ્મણે બ્રહ્મરૂપિણે ।
બ્રહ્મણસ્પતયે ચૈવ બ્રહ્મદાત્રે નમો નમઃ ॥ ૫૦॥

કિમસ્માભિઃ સ્તુતિઃ કાર્યા હ્યપારગુણરાશયે ।
નમો નમો ગણેશાય ત્વં તુષ્ટો ભવ સર્વદા ॥ ૫૧॥

કૃતાઞ્જલિપુટાઃ સર્વે ઋષયશ્ચ સ્થિતાઃ પુરઃ ।
તાન્ દૃષ્ટ્વા ગણરાજસ્તુ હૃષ્ટઃ સન્ પ્રત્યુવાચ હ ॥ ૫૨॥

(ભો ભોસ્તત્ત્વાનિ સર્વાણિ વરં બ્રૂત હૃદીપ્સિતમ્ ।
તપસાઽહં પ્રસન્તુષ્ટો ભક્ત્યા સ્તોત્રેણ ભાવતઃ ॥ ૩॥

ભવત્કૃતમિદં સ્તોત્રમતિપ્રીતિકરં મમ ।
સર્વસિદ્ધિપ્રદં ચૈવ પઠતે શ્ૃણ્વતે ભવેત્ ॥ ૪॥

વિદ્યાકામો લભેદ્વિદ્યાં ધનકામો ધનં લભેત્ ।
સ્ત્રીકામઃ સ્ત્રિયમાપ્નોતિ પુત્રકામઃ સુપુત્રકાન્ ॥ ૫॥

મુક્તિકામો લભેન્મુક્તિં જયકામો જયં લભેત્ ।
અસ્ય સ્તોત્રસ્ય પઠનાત્ વાઞ્છિતં લભતે પરમ્ ॥ ૬॥)

ઇતિ તત્ત્વૈઃ કૃતા ગણેશસ્તુતિઃ સમાપ્તા । ૧.૭-૮

*Ganesha Stuti by Tattva*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*